## शिवशमरिष्टस्य करे। (१४३/३४८९)

करोति इति करः प्रत्ययार्थः। तत्सामर्थ्यलभ्या षष्ठी समर्थविभक्तिः। शिवादिभ्यः [1]शब्देभ्यः षष्ठीसमर्थेभ्यः करे इत्येतस्मिन्नर्थे तातिल् प्रत्ययो भवति। शिवं करोति [2]इति शिवतातिः। (पै. ५.३६.१)। 'शंतातिः' (ऋ. ८.१८.७)। [3]'अरिष्टतातिः' (ऋ. १०.६०.८)॥

## भावे च। (१४४/३४९०)

भावे चार्थे छन्दसि विषये शिवादिभ्यः[4] तातिल् प्रत्ययो भवति। शिवस्य भावः शिवतातिः (पै. ५.३६.१)। 'शंतातिः' (ऋ. ८.१८.७)। 'अरिष्टतातिः' (ऋ. १०.६०.८)। यतः पूर्णोऽवधिः। अतः परमन्यः प्रत्ययो[5]ऽधिक्रियते॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ

चतुर्थाध्यायस्य चतुर्थः पादः॥

प्रथमो भागः समाप्तः

---o---

1. प्रातिपदिकेभ्यः क. इ. 2. इति नास्ति ब. इ. 3. अथो अरिष्टतातये (ऋ. 10.60.8) 4. प्रातिपदिकेभ्यः इत्यधिकम् ब. क. ड, शब्देभ्यः इत्यधिकम् ह. 5. विधीयते फ. ज.